# ॥ શ્રીગઙ્ગાસ્તોત્રમ્ ॥

.. shrI ga NgAstotram ..

sanskritdocuments.org

August 20, 2017

# .. shrI ga NgAstotram ..

# ॥ શ્રીગઙ્ગાસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : gaNgAstotram

File name : gangastotra.itx

Category : devii, nadI, stotra

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Siva Pandyaram siva at toledo.sbi.com

Proofread by : Siva Pandyaram siva at toledo.sbi.com, NA

Latest update : November 1, 2010, May 28, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીગઙ્ગાસ્તોત્રમ્ ॥

દેવિ સુરેશ્વરિ ભગવતિ ગઙ્ગે ત્રિભુવનતારિણિ તરલતરઙ્ગે ।
શઙ્કરમૌલિવિહારિણિ વિમલે મમ મતિરાસ્તાં તવ પદકમલે ॥ ૧॥

ભાગીરથિ સુખદાયિનિ માતસ્તવ જલમહિમા નિગમે ખ્યાતઃ ।
નાઽહં જાને તવ મહિમાનં પાહિ કૃપામયિ મામજ્ઞાનમ્ ॥ ૨॥

હરિપદપાદ્યતરઙ્ગિણિ ગઙ્ગે હિમવિધુમુક્તાધવલતરઙ્ગે ।
દૂરીકુરુ મમ દુષ્કૃતિભારં કુરુ કૃપયા ભવસાગરપારમ્ ॥ ૩॥

તવ જલમમલં યેન નિપીતં પરમપદં ખલુ તેન ગૃહીતમ્ ।
માતર્ગઙ્ગે ત્વયિ યો ભક્તઃ કિલ તં દ્રષ્ટું ન યમઃ શક્તઃ ॥ ૪॥

પતિતોદ્ધારિણિ જાહ્નવિ ગઙ્ગે ખણ્ડિતગિરિવરમણ્ડિતભઙ્ગે ।
ભીષ્મજનનિ હે મુનિવરકન્યે પતિતનિવારિણિ ત્રિભુવનધન્યે ॥ ૫॥

કલ્પલતામિવ ફલદામ્ લોકે પ્રણમતિ યસ્ત્વાં ન પતતિ શોકે ।
પારાવારવિહારિણિ ગઙ્ગે વિમુખયુવતિકૃતતરલાપાઙ્ગે ॥ ૬॥

તવ ચેન્માતઃ સ્રોતઃ સ્નાતઃ પુનરપિ જઠરે સોઽપિ ન જાતઃ ।
નરકનિવારિણિ જાહ્નવિ ગઙ્ગે કલુષવિનાશિનિ મહિમોત્તુઙ્ગે ॥ ૭॥

પુનરસદઙ્ગે પુણ્યતરઙ્ગે જય જય જાહ્નવિ કરુણાપાઙ્ગે ।
ઇન્દ્રમુકુટમણિરાજિતચરણે સુખદે શુભદે ભૃત્યશરણ્યે ॥ ૮॥

રોગં શોકં તાપં પાપં હર મે ભગવતિ કુમતિકલાપમ્ ।
ત્રિભુવનસારે વસુધાહારે ત્વમસિ ગતિર્મમ ખલુ સંસારે ॥ ૯॥ ગતિર્મય

અલકાનન્દે પરમાનન્દે કુરુ કરુણામયિ કાતરવન્દ્યે ।
તવ તટનિકટે યસ્ય નિવાસઃ ખલુ વૈકુણ્ઠે તસ્ય નિવાસઃ ॥ ૧૦॥

વરમિહ નીરે કમઠો મીનઃ કિં વા તીરે શરટઃ ક્ષીણઃ ।
અથવા શ્વપચો મલિનો દીનસ્તવ ન હિ દૂરે નૃપતિકુલીનઃ ॥ ૧૧॥

ભો ભુવનેશ્વરિ પુણ્યે ધન્યે દેવિ દ્રવમયિ મુનિવરકન્યે ।
ગઙ્ગાસ્તવમિમમમલં નિત્યં પઠતિ નરો યઃ સ જયતિ સત્યમ્ ॥ ૧૨॥

યેષાં હૃદયે ગઙ્ગાભક્તિસ્તેષાં ભવતિ સદા સુખમુક્તિઃ ।

મધુરાકાન્તાપઞ્ઝટિકાભિઃ પરમાનન્દકલિતલલિતાભિઃ ॥ ૧૩॥

ગઙ્ગાસ્તોત્રમિદં ભવસારં વાઞ્છિતફલદમ્ વિમલં સારમ્ ।
શઙ્કરસેવકશઙ્કરરચિતં પઠતિ સુખીસ્તવ ઇતિ ચ સમાપ્તઃ ॥ ૧૪॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં ગઙ્ગાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Siva Pandyaram (siva at toledo.sbi.com), NA

.. shrI ga NgAstotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*